श्रीमते रामानुजाय नमः

अभिरामवराख्यैः वरवरमुनिपौत्रैः विरचिता अन्तादिरूप

# ।। नक्षत्रमालिका ।।

अस्मासु वत्सलतया कृपया च भूयः
स्वेच्छावतीर्णमिह सौम्यवरं मुनीन्द्रं।
आचार्यपौत्रमभिरामवराभिधानं
अस्मद्गुरुं परमकारुणिकं नतोSस्मि।।

श्रीमान् परांकुश मुनिर्जीयाद्यद्ज्ञान मुद्रया।
नेन्द्रियाश्वयुजो नृणां नित्यं विषय वीथयः।। १
यदुरसि भरणीया स्रग्विकसति वकुलानद्धा।
स जयति महिमानाथो मुररिपु पदसक्तो नः।। २
नन्ताSनन्तान्घ्रिनलिनयुग्मे कर्ता लोकार्तिकबलनानां।
भद्राय द्राविडनिगमानां द्रष्टा पुष्टाय वकुलभृत्स्यात्।। ३
स्यादेव सामे फणितिश्शठारे र्ययोदितोच्चैस्सरणिर्जनानां।
आरोहिणीनाप्यवरोहिणी हि वेदोदिता तु द्वयमभ्युपैति।।४
तिलकमाह नकाचिदपि श्रुतौ त्रिजगतामृगशीर्षसमुद्भवा।
स्फुटतरं वकुलाभरणीयवाक् पुरुषमादिमशेषपदैरपि।।५
पित्रादि स्सकलविधोSपि बन्धुवर्गो
यस्यासीत्सरसिज वासिनीसहायः।
आविस्स्यु र्घनकरुणा रसावसेकैः
आर्द्रा मे वकुलभृतः कटाक्षपाताः।। ६



तामाश्रयामि करुणां वकुलाभिरामां
याSसौ पुनर्वसुमती वलयेSवतीर्णा।
प्रज्ञाद्दशोन्मिषितया प्रथितानुभावा
ज्योतिःपरं यदनिदं तदिदं चकार।। ७
रचितवति रमाया नायकस्यांघ्रिपुष्यत्
प्रणयरस सुधाब्धिस्रोतसि स्वैरगाहं।
प्रभवति कलिघर्म प्रावृषेण्याम्बुवाहे
वकुलधरमुनींद्रे तापवार्ता कथं नः।। ८
नमज्जनस्य चित्तभित्ति भक्तिचित्र तूलिका
भवाहिवीर्य भञ्जने नरेंद्रमंत्र यंत्रणा।
प्रपन्नलोककैरव प्रसन्नचारु चंद्रिका
शठारि हस्तमुद्रिका हठाद्धुनोतु मे तमः।। ९
मनस्स्फटिक दर्पण प्रतिफलत्परब्रह्मणः
प्रदर्शनमिवाचरन् प्रथितबोध मुद्रांकितः।
सतामभय शंसिता भवभयाभितप्तात्मना
मघानि शमयेत नश्शठरिपोरवामः करः।। १०
रमयतु शठशत्रुरत्युन्नताचार युक्तैर्जनैः
अवनत पदपद्मयुग्मोSनुकम्पामृताम्भोनिधिः।
बहुविधकृत पूर्वफल्गुन्यगाचार चिंताकुलं
हृदयमसद्दशात्म पादारविन्दानुषङ्गान्मम।। ११
मग्नं मानस मास्मभूश्शठरिपोरव्याजसिद्धा कृपा
नौका काचन नाविकोSपि सपुनस्संतारकग्रामणीः।
एतेनोत्तरफल्गुनीरस परिक्लिष्टोपभोगोर्मिकं
दुःखावर्तदुरंतपारगमनं संसारवाराकरं।। १२

रत्नदीपिकायमान हस्तमुद्रिकाकृत त्रयीगिरींद्र
कन्दरान्तराल गाढरूढरूढिमन्निदानसूचनेन।
द्राविडागमोपगीति मूलसेकशीत वीतनिद्रपत्र
दिव्यतिंत्रिणी समीपगेन नाथवानहं परांकुशेन।। १३
नत्या नत्यागकारी क्षणमपि चिदचित्त्रायकामेयकामे
छन्दश्छन्दस्वरूपे महसि कमलया भासमानेऽसमाने।
श्रेयश्श्रेयस्विसंघैःपरिचयसुरभिःकैसराणां सराणां
पातात्पाताद्भवाब्धौ शठरिपुरिह नो वीक्षणेन क्षणेन।। १४
न प्रपत्तिवर्त्मनः प्रवर्तनापदानवासनानुसारि
नव्यपेत सर्वदाजलाशयान्वयं कथं समं सरोजं।
स्वातिकामि योगिबृन्द चित्तपद्म बद्धसौहृदानुरक्त
रूपयोश्शठारि पादयोर्युगेन संनतार्ति भञ्जनेन।। १५
नत्वा यां कुसुमायुधेषुधिरुचि व्याघातमातन्वतीं
शेमुष्या महतामहायि तरुणीजङ्घासु जङ्घालता।
विस्तीर्णच्छविशाखया शठजितो वृत्तानुपूर्वीजुषा
जङ्घाकल्पतरुश्रिया सुरभितं चिन्तावनं मामकं।। १६
कनदवयव लोलदाभावदातापगास्रोतस
स्समुदित गुरुबुद्बुदाकार सन्देहसन्दायिनोः।
ककुदधिगत मित्रभावं स्वभावाद्युगं जानुनो
र्मम हृदि शठवैरिनाम्नो मुनींद्रस्य संदीव्यतु।। १७
तुलासरणिसीमनि प्रथितरूपया हस्तिनां
करेण करभेण वा कदलिकाप्रकाण्डेन वा।
तथोपरि च पृश्यतां नयनबन्धनज्येष्ठया
चमत्कृतिमती मतिश्शठरिपूरु लक्ष्म्या मम।। १८



महःप्ररोहमञ्जरी मनोज्ञ रत्नमेखला
कलाप पुष्पिता कटीतटीपटी शठद्विषः।
उरस्स्रवत्प्रभाझरी निपात निम्ननाभिका
वटोत्थफेन मण्डली वितर्कमूलमेव नः।। १९
नयनसुभग नाभीमुद्दिशन्ती शठारेः
सर इति परिभाषा ढौकते सार्थकत्वं।
सततमितरथा नस्संहता नेत्रमीनाः
कथमिह विहरेयुः कौतुकोद्रेकयुक्ताः।। २०
तां मध्यदेश सुषमामवलोकयामि
रोमावळी त्रिवळिका रुचिरां शठारेः।
रेखोत्तरा यदुपमामधिकाभिलाषा
ढौकेत वा यदि न वा वटपत्रशोभा।। २१
भासा न व्यतिभिदुरी भवन्ति भृङ्गाः
हारस्थादुरसि हरिन्मणेश्शठारेः।
आरूढा वकुलमयीं स्रजं सुगन्धां
शब्देन श्रवणसुखेन यान्ति भेदं।। २२
दमवतः कुरुते मदनोद्धतान्
सुघटयत्यबुधान् बुधनिष्ठया।
प्रथितमुद्रमनिद्रसरोरुह
प्रणयि पाणितलं शठजिन्मुनेः।। २३
नेह संसरणरोग संहतिर्जायते शतभिषक्चिकित्सया।
अन्तरेण शठवैरि कंधरालम्बमान वकुलस्रजां रजः।। २४
जन्मध्वंसं दिशति जनानां वक्त्रं दीप्रोष्ठपदमनोज्ञं।
मन्दस्मेरं मधुर कटाक्षं सुभ्रूरेखं सुभग कपोलं।। २५

लसति हि भजतां भाद्रोत्तरपद करणारूढं।
शठरिपु मकुटं भासा परिहृत दुरितध्वान्तं।। २६
अन्तरेण शठारातिं कस्संसारेऽवतीह नः।
तदहं हृदये नित्यं निदधे तद्वपुश्श्रियं।। २७
वाचिकी वरिवस्या मे तारका मालिकात्मिका।
परांकुश पदाब्जेन परिष्कारवती भवेत्।। २८

## || इति नक्षत्रमालिका ||

श्रीमते शठकोपाय नमः

मंडयं नायक रामानुज